'बिल्वञ्च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥'

जलं बाला । बिल्वादिक्वाथावलेहौ । अतीसारेषु ॥
'समङ्गाधातकीलोध्रसारिवाभिः शृतं जलम् ।
दुर्द्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥'
समङ्गा लज्जालुमूलम् । समङ्गादिक्वाथो दुर्द्धरेऽतीसारे ॥ * ॥
'विडङ्गान्यजमोदा च पिप्पलीतण्डुलानि च ।
एषामालोड्य चूर्णानि सुखं तप्तेन वारिणा ।
आमे प्रशस्तेऽतीसारे कुमारं पाययेद्भिषक् ॥'
विडङ्गादिचूर्णमतीसारे ॥ * ॥
'मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥'
मोचरसलज्जालुमूलधातकीफुलकमलकेशरसहितंतोला १ तण्डुलकीखुदीतोला १ जलतोला २१ सर्व्वमेकीकृत्य यवागूः साधनीया । मोचरसादियवागू रक्तातिसारे ॥ * ॥
'नागरातिविषामुस्ताबालकेन्द्रयवैः शृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥'
नागरादिक्वाथः सर्व्वातीसारे ॥ * ॥
'लाजायष्टिमधुका शर्करा क्षौद्रमेव च ।
तण्डुलोदकयोगेन क्षिप्रं हन्ति प्रवाहिकाम् ॥'
लाजादिचूर्णं प्रवाहिकायाम् ॥ * ॥
'रजनी सरलो दारु बृहती गजपिप्पली ।
पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥
दीपनं ग्रहणीं हन्ति मारुतार्त्तिसकामलाम् ।
ज्वरातीसारपाण्डुघ्नं बालानां सर्व्वरोगनुत् ॥'
रजन्यादिचूर्णं ग्रहण्यादौ ॥ * ॥
'पौष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
कृतं चूर्णन्तु सक्षौद्रं शिशूनां पञ्चकासजित् ॥'
पौष्करादिचूर्णं कासेषु ॥ * ॥
'पौष्करातिविषावासाकणाशृङ्गीरसं लिहन् ।
मधुना मुच्यते बालः कासैः पञ्चभिरुच्छ्रितैः ॥'
पुष्करादिरसः कासेषु ॥ * ॥
'धात्रीकुसुमसंजातकेशरैरवलेहिका ।
मधुना चिरसंजातान् शिशोः कासान् व्यपोहति ॥'

कासे ॥ * ॥
'धान्यं शर्करया युक्तं तण्डुलोदकसंयुतम् ।
पानमेतत् प्रदातव्यं कासश्वासापहं शिशोः ॥'
धान्यादिपानं कासश्वासयोः ॥ * ॥
'द्राक्षावासाभयाकृष्णाचूर्णं क्षौद्रेण सर्पिषा ।
लीढं श्वासं निहन्त्याशु कासञ्च तमकं तथा ॥'
तमकं श्वासभेदम् । द्राक्षादिचूर्णं कासश्वासयोः ॥
'चूर्णं कटुकरोहिण्या मधुना सह योजयेत् ।
हिक्कां प्रशमयेत् क्षिप्रं छर्द्दिञ्चापि चिरोत्थिताम् ॥'

हिक्कायां छर्द्यांञ्च ॥ * ॥
'आम्रास्थिलाजसिन्धूत्थं सक्षौद्रं छर्द्दिनुद्भवेत् ॥'
छर्द्दाम् ॥ * ॥

'पीतं पीतं वमेद्यस्तु स्तन्यं तं मधुसर्पिषा ।
द्विवार्त्ताकी फलरसं पञ्चकोलञ्च लेहयेत् ॥'
द्विवार्त्ताकी बृहतीद्वयम् ॥ * ॥

'पञ्चकोलानि पिप्पलीपिप्पलीमूलचव्यचित्रकनागराणि ॥'

क्षीरच्छर्द्याम् ॥ * ॥
'ह्रीवेरशर्कराक्षौद्रं लीढं तृष्णाहरं परम् ।
घृतेन सिन्धुविश्वैलाहिङ्गुभार्गीरजो लिहन् ॥
आनाहं वातिकं शूलं हन्यात्तोयेन वा शिशुः ॥'
आनाहे वातशूले च ॥ * ॥
'कणोषणासिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः ।
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः ॥'
मूत्राघाते ॥ * ॥
'यदा तु दुर्ब्बलो बालः खादन्नपि च वह्निमान् ।
विदारीकन्दगोधूमयवचूर्णं घृतप्लुतम् ॥
खादयेत्तदनु क्षीरं शृतं समधुशर्करम् ॥'
कार्श्ये ॥ * ॥
'शुक्तकुष्माण्डबीजानि भद्रदारुकलिङ्गकान् ।
पिष्ट्वा तोयेन संलिम्पेल्लेपोऽयं शोथहृच्छिशोः ॥'
शोथे ॥ * ॥
'पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
क्षतवीसर्पविस्फोटज्वराणां शान्तये शिशुः ॥'
क्षतवीसर्पविस्फोटज्वरेषु ॥ * ॥
'गृहधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्त्याशु सिध्मपामविचर्च्चिकाम् ॥
सारिवातिललोध्राणां कषायो मधुकस्य च ।
संस्राविणि मुखे शस्तो धावनार्थं शिशोः सदा ॥'
मुखस्रावे ॥ * ॥
'अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ॥'
मुखपाके ॥ * ॥
'पिप्पलीत्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतम् ।
बालो रोदिति यस्तस्मै लेढुं दद्यात् सुखावहम् ॥'

रोदने ॥ * ॥
'हरीतकी वचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात् ॥'
तालुकण्टके ॥ * ॥

'फलत्रिकं लोध्रपुनर्नवे च
सशृङ्गवेरं बृहतीद्वयञ्च ।
आलेपनं श्लेष्महरं सुखोष्णं
कुकूणके कार्य्यमुदाहरन्ति ॥'

कुकूणके ॥ * ॥
'मृत्पिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा ।
स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति ॥'
नाभिशोथे ॥ * ॥
'नाभिपाके निशालोध्रप्रियङ्गुमधुकैः शृतम् ।
तैलमभ्यञ्जने शस्तमेभिर्वाप्यवधूलनम् ॥
दग्धेन च्छागशकृता नाभिपाकेऽवचूर्णनम् ।
त्वक्चूर्णैः क्षीरिणां वापि कुर्य्याच्चन्दनरेणुना ॥'

नाभिपाके ॥ * ॥
'गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।
रसाञ्जनं विशेषेण पानलेपनयोर्हितम् ॥
शङ्खयष्ट्यञ्जनैश्चूर्णं शिशूनां गुदपाकनुत् ॥'
अञ्जनं रसाञ्जनम् । गुदपाके ॥ * ॥
'शङ्खसौवीरयष्ट्याह्वैर्लेपो देयोऽहिपूतने ॥'
अहिपूतने ॥ * ॥
'पारिगर्भिकरोगे तु पूज्यते वह्निदीपनम् ॥'
पारिगर्भिके ॥ * ॥
'दन्तपालिन्तु मधुना चूर्णेन प्रतिसारयेत् ।
धातकीपुष्पपिप्पल्योर्धात्रीफलरसेन वा ॥
दन्तोत्थानभवा रोगाः पीड़यन्ति न बालकम् ।
जाते दन्ते हि शाम्यन्ति यतस्तद्धेतुका गदाः ॥'

दन्तोद्भेदजरोगेषु ॥ * ॥
'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥
अर्कपुष्पीमधु घृतं चूर्णितं कनकं वचा ।
सहेमचूर्णं कैटर्य्यं श्वेता दूर्व्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राशा अर्द्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलपुष्टिकराः स्मृताः ॥'
सौवर्णचूर्णम् । चतुर्ष्वपि योगेषु मारितसुवर्णचूर्णम् । मत्स्याक्षकः ब्राह्मी इति लोके बकम इत्येके । अर्कपुष्पी अर्कसदृशपुष्पलता । कैटर्य्यं कट्फलम् । श्वेता दूर्व्वाविशेषणं श्वेतेति केचित् । संवत्सरं यावदेते योगाः प्रयोज्याः द्वादशवर्षाणीति केचित् ॥ * ॥
'बालानाञ्च वपुर्मेधाबलपुष्टिकराः स्मृताः ।
लाक्षारसे समे तैलं मस्तुन्यथ चतुर्गुणे ॥
रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुतैः ।
शताह्वादारुयष्ट्याह्वमूर्व्वातिक्ताहरेणुभिः ॥
संसिद्धं ज्वररक्षोघ्नं बलवर्णकरं शिशोः ॥"
लाक्षादितैलं बालेषु ॥ * ॥ इति भावप्रकाशे बालरोगाधिकारः ॥

बालवायजं क्ली, ( बालवाये वैदुर्य्यप्रभवे देशविशेषे जायते इति । जन्+ड । ) वैदूर्य्यम् । इति त्रिकाण्डशेषः ॥ ( विवृतिर्विशेषश्चास्य वैदूर्य्यशब्दे ज्ञेयः ॥ )

बालवासः [ स् ] क्ली, ( बालानां लोम्नां बालैर्निर्म्मितं वा वासः । ) केशनिर्म्मितवस्त्रम् । बालकस्य वस्त्रञ्च । इति केचित् ॥

बालवाह्यः पुं, ( बालाः शिशवो वाह्या यस्य । एते खलु कस्मिंश्चिदुपस्थिते भये शिशून् पृष्ठे निधाय पलायन्त इति प्रसिद्धेस्तथात्वम् । ) वनच्छागः । इति हारावली । ८१ ॥ बालकवहनीये त्रि ॥

बालव्यजनं, क्ली, ( बालस्य चमरीपुच्छस्य बालेन वा निर्म्मितं व्यजनम् । ) चामरम् । तत्पर्य्यायः । रोमगुच्छः २ प्रकीर्णकम् ३ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । १३ ।

"लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्व्वन्ति बालव्यजनैश्चमर्य्यः ॥")